International Journal of Multidisciplinary Horizon

ISSN:**3049-2017**
IJMH 2025; 2(2): 22-24
© 2025 IJMH
www.themultijournal.com
Received: 21-04-2025
Accepted: 24-04-2025
Publish : 25-04-2025

**डा.बि.कामाक्षम्मा**
सहायकाचार्या,
श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः,
नई दिल्ली - 110016

**Correspondence:**
**डा.बि.कामाक्षम्मा**
सहायकाचार्या,
श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः,
नई दिल्ली - 110016

# क्षुतक्षेमीयम् – अलङ्कारशास्त्रीयमध्ययनम्

**डा.बि.कामाक्षम्मा**

सुविशाले संस्कृतवाङ्मये साहित्यस्य तत्रापि रूपकसाहित्यस्य विशिष्टं स्थानं वर्तते। स्थूलतया काव्यं द्विविधम्। दृश्य-श्रव्यत्वभेदेन। तत्रापि दृश्यकाव्यं विशिष्यते। अत एव प्रोक्तमस्ति काव्येषु नाटकं रम्यम् इति। दृश्यं तत्राभिनेयम्। तद्रूपारोपात्तु रूपकम्। रूपकाणि दश वर्तन्ते। नाटकं, प्रकरणं, भाणः, प्रहसनम्, डिमः, व्यायोगः, समवकारः, वीथी, अङ्कः, ईहामृगः। आचार्य-पञ्चाननविरचितं क्षुतक्षेमीयम् एकं प्रहसनं भवति। शोधपत्रेस्मिन् क्षुतक्षेमीयस्य आलङ्कारिकमध्ययनं क्रियते।

**कविपरिचयः –**

क्षुतक्षेमीयप्रहसनस्य पुष्पिकायां कवेः संक्षिप्तपरिचयः लभ्यते। तदनुसारं सिद्धगौतमकुलोद्भवाः आचार्यपञ्चाननः। तस्य तनूजः श्रीश्री जीवन्यायभट्टाचार्यः इति मात्रं लभ्यते। देशकालादिविषये नोपलभ्यते। (पुष्पिका - इति सिद्धगौतमकुलोद्भवाचार्य-पञ्चाननतनुज-श्रीश्रीजीवन्यायतीर्थभट्टाचार्यरचितं क्षुतक्षेमीयं नाम प्रहसनम् समाप्तम्।) डा.सूरं श्रीनिवासुलु वर्येणलिखिते संस्कृतप्रहसनसाहित्यम् नामके ग्रन्थे जीवन्यायतीर्थस्य क्षुतक्षेमीयम् इति लिखितमस्ति।

**प्रहसनस्य स्वरूपम्, तत्भेदाश्च -**

क्षुतक्षेमीयम् एकं प्रहसनम्। अतः आदौ प्रहसनमधिकृत्य किञ्चित् ज्ञास्यामः। यत्र कविकल्पित-निन्दार्हाणां जनानां चरितं वर्णितं भवति तत् प्रहसनम्। अस्मिन् आरभटीवृत्तिः[1], विष्कम्भकं[2], प्रवेशक[3]श्च न भवन्ति। एतत् हास्यरसप्रधानं भवति।

अस्मिन् वीथ्यङ्गानि न भवन्ति। तपस्वी, ब्रह्मवादी, ब्राह्मणेषु कश्चन नायको भवति। अस्य प्रहसनस्य भेदत्रयं भवति – शुद्धं, सङ्कीर्णम्, विकृतश्चेति।

**शुद्धप्रहसनम् -** यत्र धृष्टः[4] नायकः भवति तत् शुद्धप्रहसनम्।

यथा – **कन्दर्पकेलः**

**सङ्कीर्णप्रहसनम्**[5]– धृष्टभिन्नं नायकमाश्रित्य यत् प्रहसनं भवति तत् सङ्कीर्णमिच्युत्यते।

यथा – **धूर्तचरितम्**

केचित् विद्वांसः बहूनां धृष्टनायकानां चरित्रं यत्र वर्णितं भवति तत् सङ्कीर्णप्रहसनमिति वदन्ति। यथा – **लटकमेलकम्।**

तत् अङ्कद्वयोपेतम् अथवा एकाङ्कनिर्मितं भवति।

> **वृत्तं बहूनां धृष्टानां सङ्कीर्णं केचिदूचिरे।**
> **तत्पुनर्भवति द्व्यङ्कमथवैकाङ्किनिर्मितम्॥**267॥

भरतमुनेः मतानुसारं यत्र वेश्या-दास-नपुंसक-विट-धूर्त-कुलटासदृशानि पात्राणि भवन्ति, अपि च यत्र स्वाभाविकवेषः, स्वाभाविकोपकरणानां चेष्टानाञ्च अनुकरणं भवति तत् सङ्कीर्णप्रहसनमिति।

> **वेश्याचेटनपुंसकविटधूर्तबन्धकी च यत्र स्युः।**
> **अविकृतवेषपरिच्छदचेष्टितकरणं तु सङ्कीर्णम्॥**

**विकृतप्रहसनम् –**

यत्र नपुंसक-कञ्चुकी-तपस्वी-विट-नट-भटप्रभृतीनां वेषभाषानुसारम् अभिनयं कुर्वन्ति तत् विकृतप्रहसनम्। एतत् विकृतप्रहसनं सङ्कीर्णेन गतार्थत्वात् तस्मिन्नेव अन्तर्भूतत्त्वात् भरतमुनिः पृथक् न प्रतिपादयामास।

**क्षुतक्षेमीयप्रहसने पात्राणि –**

1.सूत्रधारः 2.विदूषकः 3.चित्रगुप्तः 4.पाचकः 5.भृत्यः 6.गृहस्वामी (गङ्गनाथः) 7.यमः 8.यमभटौ च।

**क्षुतक्षेमीयस्य कथासारः –**

नान्द्यन्ते सूत्रधारः वैवाहिके कर्मणि मध्याह्नभोजनार्थम् अत्यन्तं कृपणस्य स्वमित्रस्य गृहं याति। तत्र विदूषकः सूत्रधारं नियम्य आमन्त्रणपत्रं दर्शये'ति पृच्छति। तयोर्मध्ये हास्यमयसम्भाषणं प्राप्नोति। अभिलषितं भोजनमप्राप्य सूत्रधारः 'श्रान्तो बुभुक्षुश्च क्व तावदिदानीं विश्रामं लप्से' इति वदति। तदभ्यन्तरे सूत्रधारस्य वचनमाम्रेडयतः चित्रगुप्तस्य प्रवेशसङ्केतेन प्रस्तावना समाप्तिमेष्यति।

चित्रगुप्तप्रवेशेन प्रथमाङ्कस्य प्रारम्भः भवति। चित्रगुप्तः श्रान्तः बुभुक्षितस्सन् रात्रौ एकं गृहमुपेत्य पिहितद्वारं प्रघट्टयति। ततः द्वौ बहिरागत्य गृहेस्मिन् पिपीलिका प्रवेशोपि नास्ति, तव प्रवेशः कथं शक्यः इति वदतः। तर्हि युवयोः प्रवेशः कथं जातः इति चित्रगुप्ते पृष्टे सति अहं पाचकः,अहं भृत्यः च। आवयोः कर्मभिः गृहस्वामिनः स्वार्थपोषणं कुर्वः अत एव आवयोः प्रवेशः इति कथयतः। तर्हि अहमपि गृहस्वामिनः स्वार्थपोषकः भवामि । तदा चित्रगुप्तः वदति यत् - गृहस्वामिनं कथय - कश्चित् दैवज्ञः गुप्तनिधिं दर्शयितुं समायातो वर्तते। तं भवान् प्राप्तुमर्हतीति। तच्छ्रुत्वा पाचक-भृत्यौ निधिप्राप्तिपिपासया तस्मै चित्रगुप्ताय स्वहस्तौ दर्शयतः कोलाहलौ कुरुतः। तदभ्यन्तरे गृहस्वामी रङ्गनाथः प्रविशति।

कृपणः रङ्गनाथः निधिवृत्तान्तं ज्ञात्वा अत्यन्तं प्रसन्नचित्तो भूत्वा चित्रगुप्तम् आकण्ठं भोजयति। किन्तु निधिलाभो भवति प्रायो हीनायुष्काणामिति स्मृत्वा भीतो भवति।

आत्मनः आयुष्कालः वर्षमात्रमवशिष्यते इति चित्रगुप्तमुखात् कथञ्चित् श्रुत्वा खिन्नो भवति। कथङ्कारं दीर्घायुर्निमित्तम् चित्रगुप्तम् उपायं पृच्छति। वर्षं व्याप्य त्वं दरिद्राणामुटजोपरि तृणाच्छादनं मुक्तहस्तो देहि एतेन पुण्येन धर्मराजः प्रसीदति तेन तवायुर्वर्धते इति चित्रगुप्तः कथयति। रङ्गनाथः एवमेव आचरन् एकवर्षानन्तरं यमपुरं याति। तत्र चित्रगुप्तः रङ्गनाथमादिशति यत् - त्वं तृणस्तूपादेकां शलाकां गृहीत्वा नासारन्ध्रे प्रवेश्य क्षुतं कुरु इति । अत्रान्तरे यमराजः प्रविशति। रङ्गनाथः चित्रगुप्तोक्तरूपेण क्षुतं करोति। सद्यः 'जीव जीवे'ति यमस्य मुखात् अप्रयत्नेन निस्सरति। यमधर्मराजस्य वचनं कदापि अनृतं न भवितुमर्हति। अतः रङ्गनाथः दीर्घायुं प्राप्य यमदूताभ्यां सह मर्त्यलोकमवाप्नोति। भरतवाक्येन प्रहसनमिदं समाप्तिमेष्यति।

**क्षुतक्षेमीयम् प्रहसनम्** – नायक-अङ्गिरसादि परिशीलनेन क्षुतक्षेमीयम् प्रहसनमिति स्पष्टम्।

**क्षुतक्षेमीयस्य मङ्गलाचरणम्, भरतवाक्यञ्च –**

**मङ्गलाचरणम्**

**यःसूरसूनुः सुरवृन्दभासुरः शूरः सुरक्षासु गतासुसंहतेः।**
**शुभाशुभाचारविचारचारुधीर्युनक्तु युष्मान् स चिरायुषान्तकः।।**

**भरतवाक्यम्**

धर्मेण लोकाः खलुधर्मराजं जित्वा विराजन्त्विह यावदिषटम्।
धर्मप्रसादादुपसद्य सद्यो मोक्षं यमायासहरंलभन्ताम्।।

**क्षुतक्षेमीये अलङ्काराः**

**उपमालङ्कारः यथा -**

यमः विषीदन्तं चित्रगुप्तमुद्दिश्य – हे चित्रगुप्त! यथा नववधू मातृगृहात् स्वसुरालयं गत्वा चिन्तान्तगङ्गा भवति तथा त्वमपि भूलोकात् यमपुरीं यदा प्रत्यागतः तदारभ्य खिन्नमनस्कः दृश्ये इति पृच्छति।

तद्यथा -

**गृहात् प्रतिनिवृत्तं विषीदन्निव दृश्यते।**
**श्वशुरालयमागत्य यथा नववधूजनः।।**

**चित्रगुप्तः यममुद्दिश्य –**

यथा नववधू मातृगृहात् स्वसुरालयं गत्वा चिन्तान्तगङ्गा भवति तथा त्वं भूलोकात् यमपुरीं यदा प्रत्यागतः तदारभ्य खिन्नमनस्कः दृश्ये इति यमस्य प्रश्नं श्रुत्वा चित्रगुप्तः वदति यत् आजीवनं आखेटं कुर्वन् व्याधः यथा दुःखितः भवति तथैव आजीवनं मारणाख्यानं दारुणं कर्म कृत्वा मम मनः दुखितमस्ति इति वदति। यद्यथा -

**चिराय मरणाख्यानं दारुणं कर्म पश्यतः।**
**कस्य चेतो न दूयेत व्याधस्येष जराभृतः।।**

अत्र चित्रगुप्त-नववध्वोः साम्यवर्णनं, चित्रगुप्त-व्याधयोः साम्यवर्णनेन उपमालङ्कारः।

**अर्थान्तरन्यासालङ्कारः -**

**सूत्रधारः**

यदि परममित्रस्य गृहे उत्सवसमये आत्मनः परिचयपत्रप्रदर्शनस्य आवश्यकता नास्ति, जगद्विदितस्य ब्राह्मणस्य यज्ञसूत्रदर्शनमावश्यकं वा इति। यद्यथा -

**परममित्रस्य गृहे परिचयार्थं का तावत् पत्रापेक्षा।**
**न खलु परिज्ञातब्राह्मणस्य यज्ञसूत्रप्रदर्शनमावश्यकम्।।**

परममित्रस्य गृहे परिचयार्थं पत्रापेक्षा नास्ति इति विशेषकथनस्य समर्थनं "न परिज्ञातब्राह्मणस्य यज्ञसूत्रप्रदर्शनमावश्यकम्" इति सामान्यकथनेन कृतमस्ति इत्यतः अर्थान्तरन्यासालङ्कारः।

**भृत्यः –**

अस्माकं भर्ता सागरः, तत्र शतकलशजलैर्वा को लाभः?

**चित्रगुप्तः -**

सागर एव पुञ्जीभवन्ति जलानि, न मरुभूमौ।
धनानि धनवन्तमेव धावन्ति, न दुर्भाग्यं दरिद्रम्

सागर एव पुञ्जीभवन्ति जलानि, न मरुभूमौ इति विशेषकथनेन धनानि धनवन्तमेव धावन्ति, न दुर्भाग्यं दरिद्रम् इति सामान्यस्य समर्थनं कृतमिति हेतोः अर्थान्तरन्यासालङ्कारः।

**सुभाषितानि**

1.न खलु परिज्ञातब्राह्मणस्य यज्ञसूत्रप्रदर्शनमावश्यकम्
2.धनानि धनवन्तमेव धावन्ति, न दुर्भाग्यं दरिद्रम्।
3. सागर एव पुञ्जीभवन्ति जलानि, न मरुभूमौ।
4.स्त्रियाश्चरित्रं पुरुषस्य भाग्यम्।

5.श्रूयते निधिलाभो भवति प्रायो हीनायुष्काणाम्।
6.पूर्वपुरुषाणां कृपयैव सम्भवन्ति वंशधराणामभ्युदयः।
7.न जातु स्यात्कुतूहलीति शास्त्रम्।
8. कृते च प्रतिकर्तव्यमेषधर्मः सनातनः।
9. प्रायो निधिलाभः हीनायुष्काणामेव भवति।
10. ममत्वबुद्धिविमुक्ता एव ऊर्ध्वलोकान्तरं गन्तुं शक्नुवन्ति।
11.भाग्यं फलति सर्वत्र।

**रसविचारः –**

प्रहसनम् हास्यप्रधानं भवति। क्षुतक्षेमीयम् आमूलाग्रं हास्यरसेन ओतप्रोतमस्ति। कथागतहास्यम्, सन्निवेशगतहास्यम्, पात्रवर्णनगत-हास्यम्, भाषागतहास्यम् । तत्र दिङ्मात्रं प्रदर्श्यते।

**सन्निवेश्यगतहास्यम्**

**विदूषकः –** भो अर्वाचीनेन भवता धनिकानां गृहे आहूता अनाहूता अन्याहूता स्वाहूताः सर्वे भोजनिमित्तम् आगच्छन्तीति। पत्रमेवात्र नियामकं भवति। अलमधिकया वाचा। यतो मित्रमात्मानं कथयसि तद् आगच्छतु भवान् मध्याह्नसत्कारं गृह्णातु च।

**सूत्रधारः –** किमत्रैव पथि भोजनव्यवस्था? कुत्र तावत् भोजनसामग्री?

ही...ही...भोः पश्यतु पश्यतु इतः काष्ठासनश्रेणीम् इतश्चषकपूर्णम् उष्णपानीयम् इतस्ताम्बूलानि इतश्च धूमवर्तिकाः। पिबतु भवान् चषकभृतम् उष्णपानीयम् गृह्णातु एकं ताम्बूलपुटकम्, एकाञ्च धूमवर्तिकाम्। ततः पूर्णोदरो भूत्वा उद्गारं कुर्वन् मन्दं मन्दं गृहं गत्वा विश्रामं लभताम्।

**सूत्रधारः –** वयस्य ईदृशस्य भोजनस्य निमन्त्रणार्थं पत्रकल्पनापि जाता।

**विदूषकः –** अथ किम् स्वतन्त्रराष्ट्रस्य धनिगृहे विधिपूर्वकं सर्वम् अनुष्ठीयते।

**सूत्रधारः –** धिग् विधिमेतादृशम्। प्रस्तुतं गृहान्नं परित्यज्य धनिगृहे परमान्नभोजनाशया समागतस्य मे ज्वलति जठराग्नौ पुनरुष्णपानीयं प्रवेश्य क्षुधावर्धकसुधाक्तताम्बूलरसं निषिच्य साक्षादग्निमयं धूमवर्तिकाधूमञ्च संयोज्य किं सत्वरमायुषो अवसाममानयामि। अहो स्वतन्त्रराष्ट्रस्य धनिनां खाद्यव्यवस्था। श्रान्तो बुभुक्षुश्च क्व तावदिदानीं विश्रामं लप्स्ये।

**आकारगतहास्यम् –**

**पाचकः –** गृहस्वामिना कथं नोक्तं दिवसे भोजनमपि नोचितमिति। अरे रामदास! पश्य ! ज्यौतिष्कोयम् मुखं पूरयित्वा गण्डद्वयं नर्तयित्वा हनू चालयित्वा नयने मीलयित्वा च किं किं न भक्षयति। पश्य! कियद् भक्ष्यं निमेषमात्रेण जठरसान् करोति। अहो अद्भुरता।

एवंरूपेण क्षुतक्षेमीयनामकं प्रहसनम् कथागत-सन्निवेशगत-पात्रवर्ण-नगत-भाषागतहास्यरसेन ओतप्रोतमस्ति, सहृदयानां दर्शकानां, पाठकानाञ्च मनांसि आह्लादयति।

**सहायकग्रन्थसूची**

1.Rupaka-chakram By
Dr.Srijiva Nyayatirtha Bhattacharya
Princepal,Bhatpara Sanskrit college
Firstedition 1972
Pbublished by Dr.Srijiva Nyayatirtha and Printed from the Arunima Printing Works, 81, simla street, Culktta
2.संस्कृतप्रहसनसाहित्यम् (तेलुगु)
सूरं श्रीनिवासुलु
प्रथमप्रकाशनम् 1986
द्वतीयप्रकाशनम् 2024,E-PDF
Dr.Suram Srinivasulu
Ph.9440242348
e-Mail: srinivasulu.suram@gmail.com
3. नाट्यशास्त्रम्
आचार्य भरतमुनिः
4.साहित्यदर्पणः
विश्वनाथकविराजः
5.दशरूपकम्
धनञ्जयः

**Foot note**

**1.आरभटीवृत्तिः –** माया – इन्द्रजाल – युद्ध - क्रोधादिनासंयुक्त-उद्धृतवृत्तिः आरभटी इत्युच्यते। वस्तूत्थापनम्, सम्पेटः, संक्षिप्तिः, अवपातनम् इति चत्वारः आरभटीभेदाः।

**2.विष्कम्भकम् -** अङ्कस्यादौ अतीत-आगामिकथाभागस्य संक्षिप्तसूचकः एव विष्कम्भकः। सः द्विविधः शुद्धः, सङ्कीर्णश्चेति।

3.प्रवेशकः – प्रवेशको तुदात्तोक्त्या नीचपात्रप्रयोजितः।
अङ्कद्वयान्त्विज्ञेयः शेषं विष्कम्भके यथा।। 57

**4.धृष्टः–** विहितापराधोपि शङ्कारहितः, तर्जितोपि लज्जारहितः, कृतापराधः प्रकटितोपि मिथ्यावादी धृष्टः इति कथ्यते
ल – कृतागा अपि निःशङ्कस्तर्जितोपि न लज्जितः।
दृष्टदोषोपि मिथ्यावाक्कथितो धृष्टनायकः।। सा.3.36।।

5.आश्रित्य कञ्चनजनं सङ्कीर्णमिति तद्विदुः।